श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री कृष्णताताचार्य विरचितः

# ॥ श्रीघण्टागुरुस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Smt. Padmini Ranganathan for proofreading the document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीघण्टागुरुस्तवः ॥

कान्तश्रीकान्तशुद्धान्तसिद्धान्तोदन्तपेटिकाः।
जयन्त्यस्मद्गुरुवराः प्राप्ताप्राकृतघोटकाः॥ १॥

व्याहारेशहरेर्योषां व्याहाराविषयां श्रये।
सेव्या ह्यलोललोलेव या वाहास्यवरोरसि॥ २॥

विशालवक्षस्थलशोभितालये निरन्तरानन्दरमाधरामृतम्।
पातुं सुदीर्घीकृतसुन्दराननं हयाननस्यास्य तनोतु नस्सुखम्॥ ३॥

श्री शङ्खचक्रचिन्मुद्रा कोशाक्षाब्जेन्दुसुन्दरः।
मधुघ्नो निगमाध्यक्षः हयास्योऽस्त्वक्ष्णि मे सदा॥ ४॥

पीयूष दुग्ध नवनीत सुधांशु कुन्द मल्लीमराळतुहिनोपल शङ्खवर्णः।
लालामरन्दरसवर्षि मुखारविन्दः वाचां पतिः हृदि बहिश्च ममाविरस्तु॥ ५॥

स्वामिन् अभङ्गुर कलानिधिमन्दुराश्व
 वादाहवेऽद्य सुगतिप्रद दोषदूर।
आम्नायहेष सुखलीनमनःखलीन
 श्रीवाह मामव विना न गतिर्मम त्वाम्॥ ६॥

प्रतिपदं प्रतिपदं परिचालयन् प्रतिपदं प्रतिपदं परिवर्जयन्।
प्रतिपदं प्रतिपदं प्रणमन् हरेः प्रतिपदं प्रतिपदं नृहयं नुमः॥ ७॥

वागीशस्य दयानिधेर्भगवतः पूर्णाः कृपादृष्टयः
 प्रज्ञानामृतवृष्टयः त्रिजगतामिष्टार्थभृन्मुष्टयः।
आम्नायावळितुष्टयः श्रुतिहरक्रव्यादहृद्यष्टयः
 वाणीवल्लभपुष्टयः मम सदा सन्त्विष्टदा घृष्टयः॥ ८॥

गुरुघण्टां सुवर्णाङ्गीं तामाद्यामभिवादये।
न पूज्यते रमेशोऽपि विना यदभिवादनम्॥ ९ ॥

अपराजितघण्टांशं क्वचिदप्यपराजितम्।
विराजितत्रयीचूडं स्तौमि देशिकशेखरम्॥ १० ॥

सुराजितरहस्यार्थं पराजितबुधैर्नुतम्।
उपरञ्जितवागीशं वन्दे तोतोद्भवं महः॥ ११ ॥

सर्वार्थसिद्धिजनकं सारश्रीकोशदर्शिनम्।
श्रीवेङ्कटेशमेवाहं वेद्मि वेदान्तदेशिकम्॥ १२ ॥

तत्तादृशो हि घण्टांशः जिगायाखिलवादिनः।
नाश्चर्यमिदमाश्चर्यं चेदाश्चर्यमितोऽस्ति किम्॥ १३ ॥

दृश्यो हरिः दृष्टिरनादिवाणी व्यासर्षितच्छिष्यगिरः प्रदीपाः।
सन्दर्शको लक्ष्मणयोगिनाथः घण्टागुरुर्येन गतस्सपन्थाः॥ १४ ॥

आचार्यरूपिणी घण्टा प्रज्ञां घटयतां मयि।
प्रणताभीष्टघटनात् यां घण्टां मन्वते बुधाः॥ १५ ॥

सर्गादिमोक्षपर्यन्तमूलवेदकरण्डकम्।
नादब्रह्म यमेवाहुस्तं देशिकमुपास्महे॥ १६ ॥

साक्षाल्लक्ष्मीविभुत्वं सुकृतसमुदयं शाश्वतं सात्वतानां
मोक्षोपायावतारं हृदयमहिकुलाधीशयोगीन्द्रवाचाम्।
स्वार्थत्यागस्वरूपं श्रुतिमकुटगभीरार्थपूर्णप्रकाशं
सारश्रीसूक्तिसिन्धुं श्रुतिशिखरगुरुं सन्ततं संस्मरामः॥ १७ ॥

अल्पायुष्यमिहाल्पबुद्धिमतपश्शक्तिं कलिप्रार्दितम्
नादब्रह्मरहस्यदूरगमिमं विश्वं द्रुतं रक्षितुम्।
या घण्टा निजदिव्यनादहृदयं सच्छास्त्रमुर्वीतलं
प्रावर्षन्निगमान्तसूरिवपुषा सा नः परा देवता॥ १८ ॥

संसाराम्बुधिपारभूमिगमने सिद्धात्मनां नाविकः
श्रुत्यन्तद्वयसामरस्यवचसां सन्धुक्षणे तान्त्रिकः।
दुस्तर्कालिपिशाचसंहतिकथा प्रोच्चाटने मान्त्रिकः
श्रुत्यन्तार्यगुरुः निजाङ्घ्रिकमले दत्तात्मनां पोषकः॥ १९ ॥

कर्मब्रह्मात्मशास्त्रप्रतिकथकचमूवृष्टवाग्घेतिजाल-
प्रत्यग्रोदग्रतैक्ष्ण्यप्रमथनचटुलासङ्ख्यवाग्वज्रवर्षः।
वेदान्ताचार्यवर्यः फणिगिरिभगवद्धेमघण्टावतारः
स्वं रूपं सप्रकारं स्फुटमुपहरतात्सत्वरं मामकाक्ष्णोः॥ २० ॥

वाजिग्रीवकृपाकटाक्षविभवं साङ्गागमानां पदम्
सत्यागारविहारनित्यरसिकं वाणीविलासादृतम्।
विश्वस्तव्यविचित्रसूक्तिभुवनप्रोदञ्चकं मन्महे
घण्टांशं चतुराननं क्षितितलप्रत्यग्रपद्मोद्भवम्॥ २१ ॥

धीमुद्रिकाक्षसरपुस्तकशङ्खचक्ररम्यं नभस्यविषयं धुतवेदशोकम्।
श्रोणोदितं शुभकलाधरमण्डलस्थं घण्टागुरुं हरिमुखं समवैमि धीशम्॥ २२ ॥

विख्यातानन्तसूरीक्षणलसितमहद्दर्शनानन्दहेतोः
श्रीशादेशादुपेतो गुरुरहमिति यः स्मारणायेव भूमौ।
तातस्यानन्तसूरेः भविकगुणनिधेः दर्शानानन्दनोऽभूत्
आत्माविर्भावकालादविरतमपि तं संश्रये देशिकेन्द्रम्॥ २३ ॥

भोगीन्द्रसूरिचरणांबुजदर्शनं यः संप्राप्य सम्यगचिरं समदर्शयन्नः।
सर्वत्र सूक्ष्मविषयग्रहणैकदक्षः घण्टागुरुस्स हि गुरुर्जगतां त्रयाणाम्॥ २४ ॥

मुखलीनसमग्रसाङ्गवेदं नखलीनातिविशालसर्वतन्त्रम्।
सुखलीनहयास्यभक्तिरूपं स्मर चित्तानिशमागमान्तसूरिम्॥ २५ ॥

अनन्तयोगीश्वरभाष्यमङ्गळं घण्टागुरोऽनन्तगिरीश्वरं तथा।
अनन्तसूरीश्वरहर्षवर्धनं त्वां वेद्मि साक्षादिह वेङ्कटेशम्॥ २६ ॥

आम्नायचूडागुरुसूक्तिवादे नैवार्थवादो न विरुद्धवाणी।
परोक्षवादो न हि संशयोक्तिः अतस्स वेदादपि माननीयः॥ २७ ॥

किं प्राप्यं सुखमक्षतं तदचिरं प्राप्यं कथं नादतः
    को नादः प्रणवस्वनः तदुदयः क्व श्रीशघण्टोदरे।
किं दत्ते स सखे पुमर्थमखिलं तल्लब्धिकामाश्च के
    सत्कामा घटयन्ति के शुभरवाः ते कस्य घण्टागुरोः॥ २८ ॥

अणोरणीयान् महतो महीयान् वेदान्तसूरेश्शुभवाग्विलासः।
सङ्ख्यावतां विस्मयमातनोति प्रत्यक्षरं विष्णुवदेव नित्यम्॥ २९ ॥

विवेश भूतानि चराचराणि कृपा यदीया सहसा समग्रा।
तं शेषशेषं निगमान्तसूरिं सञ्चिन्तयेऽहं वसुदेवसूनुम्॥ ३० ॥

विमलान्तरङ्गधृतवागधीश्वरं परमान्तरङ्गमुरगेन्द्रयोगिनः।
निगमान्तरङ्गनटदेशिकं श्रये सुगमान्तरङ्गमकरोत् श्रुतानि यः॥ ३१ ॥

कल्याणी कविता सुतर्कितकथा सिंहालयस्थेड्यता
    कल्याणप्रियता गुणप्रणयिता धीशालिता नेतृता।
श्री मन्त्रप्रियता नतेषु समता श्री वेङ्कटेशाख्यता
    यस्मिन् सन्ति भवेऽत्र दान्तगुरवे भव्याय तस्मै नमः॥ ३२ ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥ ३३ ॥

प्रीयतां सदेशिक शेखरः - प्रीयन्तां मे गुरवश्च॥

॥ इति श्रीघण्टागुरुस्तवः समाप्तः ॥